of daughters. **–भर्तृ** *m.* 'a daughter's husband', a son-in-law.

**पुत्रंचारिन्** N. of some plant; Mātaṅga L. 10. 10.

**पुत्रंजीवः, –वकः** N. of a plant (from its seeds or flowers are made garlands and worn to keep children in good health).

**पुत्रिन्** *a.* (**–णी** *f.*) Having a son or sons; अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् R. 1. 91; V. 5. 14. *–m.* The father of a son. **–णी** 1 The mother of a son. –2 A parasitical plant.

**पुत्रिय, पुत्रीय, पुत्र्य** *a.* Relating to a son, filial.

**पुत्री** 1 A daughter. –2 N. of Durgā; see पुत्रिका also.

**पुत्रीकृ** 8 U. To adopt as a son; अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन R. 2. 36.

**पुत्रीय** *a.* Relating to a son; ततः प्राक्रमदिष्टिं तां पुत्रीयां पुत्रकारणात् Rām. 1. 15. 3.

**पुत्रीयति** Den. P. 1 To wish for a son. –2 To treat like a son.

**पुत्रीया** The desire of a son.

**पुथ्** I. 4 P. (पुथ्यति) To injure, hurt. *-Caus.* 1 To destroy completely, annihilate. –2 To overpower, drown (as a sound). –3 To speak. –4 To shine. -II. 10 U. (पोथयति-ते) To shine.

**पोथित** *p. p.* Hurt, killed, destroyed.

**पुद्गल** *a.* Beautiful, lovely, handsome. **–लः** 1 Atom (परमाणुः) पुद्गलाः परमाणवः Śrīdhara. –2 The body, matter; A. Rām. 3. 2. 28. –3 The soul. –4 The Ego or individual. –5 Man. –6 An epithet of Śiva.

**पुन्थ्** 1 P. 1 To kill, to hurt. –2 To suffer; L. D. B.

**पुनर्** *ind.* 1 Again, once more, anew; न पुनरेवं प्रवर्तितव्यम् Ś. 6; किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः Ku. 5. 83; so पुनर्भू 'to become a wife again.' –2 Back, in an opposite direction (mostly with verbs); पुनर्दा 'to give back, restore'; पुनर्या –इ-गम् &c. 'to go back, return' &c. –3 On the other hand, on the contrary, but, however, nevertheless, still (with an adversative force); प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः। अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि U. 3. 14; मम पुनः सर्वमेव तन्नास्ति U. 3. –4 Further, furthermore, besides; पुनः पुनः 'again and again,' 'repeatedly', 'frequently'; पुनः पुनः सुतनिषिद्धचापलम् R. 3. 42; किं पुनः 'how much more', or 'how much less'; see under किम्. पुनरपि again, once more, and also; on the other hand. **-Comp. –अन्वयः** returning; किंवा गतोऽस्य पुनरन्वयमन्यलोकम् Bhāg. 6. 14. 57. **–अपगमः** going away again. **–अर्थिता** a repeated request. **–आगत** *a.* come back, returned; गोव्रजात् पुनरागतम् Ms. 11. 195. **–आगमः, –मनम्** coming back, return; भस्मीभूतस्य देहस्य पुनरागमनं कुतः Sarva. S.; इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च Pūja Mantram. **–आधानम्, –आधेयम्** renewing the consecrated fire; पुनर्दारक्रियां कुर्यात् पुनराधानमेव च Ms. 5. 168. **–आवर्तः** 1 return. –2 repeated birth. **–आवर्तिन्** *a.* returning to mundane existence; आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन Bg. 8. 16. **–आवृत्** *f.* **–आवृत्तिः** *f.* 1 repetition. –2 return to worldly existence, repetition of birth; करोति पुनरावृत्तिस्तेषामिह न विद्यते Y. 3. 194. –3 revision, another edition (of a book &c). **–उक्त** *a.* 1 said again, repeated, reiterated. –2 superfluous, unnecessary; शशंस वाचा पुनरुक्तयेव R. 2. 68; Śi. 7. 64. (**–क्तम्**), **पुनरुक्तता** 1 repetition. –2 superfluity, redundancy, uselessness, tautology; V. 5. 15; व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुना संसारेण कदर्थिताः Bh. 3. 78. °जन्मन् *m.* a Brāhmaṇa (द्विजन्मन्). **पुनरुक्तवदाभासः** seeming tautology, appearance of repetition, regarded as a figure of speech; *e. g.* भुजंगकुण्डलीव्यक्तशशिशुभ्रांशुशीतगुः। जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः S. D. 632; (here the first impression of the tautology is removed when the passage is rightly understood; cf. also K. P. 9 under पुनरुक्तवदाभास). **–उक्तिः** *f.* 1 repetition. –2 superfluity, uselessness, tautology. **–उत्थानम्** rising again, resurrection. **–उत्पत्ति** *f.* 1 reproduction. –2 return of birth, metempsychosis. **–उत्पादनम्** reproduction. **–उपगमः** return; क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः U. 2. 13. **–उपोढा, –ऊढा** a woman married again. **–क्रिया** *f.* repetition, doing again; न च कृतस्य क्रमानुग्रहार्थं पुनःक्रिया न्याय्या। ŚB. on MS. 12. 1. 16. **–गमनम्** return, going again. **–जन्मन्** *n.* repeated birth, metempsychosis; मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते Bg. 8. 16. **–जात** *a.* born again. **–डीनम्** a particular manner of flying; Mb. 8. 41. 28. **–णवः, –नवः** 'growing again and again', a finger-nail. **–दारक्रिया** marrying again, taking a second wife; Ms. 5. 168. **–नवा** hog-weed, Boerhavia Procumbens (Mar. घेटुळी). **–पुना (पुनःपुना)** N. of a river in Behār; कीकटेषु गया रम्या नदी पुण्या पुनःपुना Vāyu. P. **–प्रत्युपकारः** returning one's obligations, requital. **–प्रसवः** (See प्रतिप्रसवः) प्रतिषिद्धस्य पत्न्या अध्ययनस्य पुनःप्रसवे न किंचिदस्ति प्रमाणम् ŚB. on MS. 6. 1. 24. **–भव** *a.* born again. (**–वः**) 1 transmigration, repeated or recurring birth; metempsychosis; अदृष्टाश्रुतवस्तुत्वात् स जीवो यत् पुनर्भवः Bhāg. 1. 3. 32; ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः Ś. 7. 35; Ku. 3. 5. –2 a finger nail, hair; Mb. 13. 111. 98; **–भविन्** *m.* the sentient soul. **–भावः** new birth, repeated birth; न गच्छन्ति पुनर्भावं मुनयः संशितव्रताः Mb. 12. 279. 5; मेने पुनर्भावमिवात्मनश्च Bu. Ch. 3. 25. **–भूः** *f.* 1 a (virgin) widow remarried. –2 re-existence. **–भोगः** 1 repeated enjoyment. –2 return of fruition. –3 repeated possession. **–वचनम्** 1 repetition. –2 repeated scriptural injunction. **–वत्सः** a weaned calf that begins to suck again. **–वसुः** (usually dual) 1 the seventh lunar mansion (consisting of two or four stars); गां गताविव दिवः पुनर्वसू R. 11. 36. –2 an epithet of Viṣṇu. –3 of Śiva. **–विवाहः** remarriage. **–संस्कारः (पुनःसंस्कारः)** repetition of any Saṁskāra or purificatory ceremony.